International Journal of Sanskrit Research 2023; 9(2): 191-193

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(2): 191-193
© 2023 IJSR
www.anantaajournal.com
Received: 01-01-2023
Accepted: 05-02-2023

**Dr. Pradeep Sharma Luitel**
Assistant Professor
Khangchendzonga State University, Sikkim, India

**Corresponding Author:**
**Dr. Pradeep Sharma Luitel**
Assistant Professor
Khangchendzonga State University, Sikkim, India

# माधवाचार्यकृत-सर्वदर्शनसङ्ग्रहे बौद्धसिद्धान्तानां विवेचनम्

**Dr. Pradeep Sharma Luitel**

## सारांश
सर्वदर्शनसङ्ग्रहे माधवाचार्येण बौद्धदर्शनेन सह अन्येषां भारतीयदर्शनानां प्रतिपादनं कृतम्। सिद्धान्तानां विवेचनक्रमे माधवाचार्येण प्रोच्यते- 'बौद्धानां मते अन्वयव्यतिरेकेण व्याप्तिज्ञानमसम्भवम्।' बौद्धैः विधिद्वयम् एतदर्थं न मन्यते, यतोऽन्वय-व्यतिरेकाभ्यां समीपवर्तिनाम् उदाहरणानां वर्तमानकाले ज्ञानं न भवेत्, किन्तु कालान्तरे देशान्तरे च विद्यमानानां पदार्थानां व्याप्तिर्भवितुं नार्हति। कदाचित्तत्र धूमाग्न्यो व्यभिचारो भविष्यत्येव। तदुत्पत्या अविनाभावस्य अथवा व्याप्तेर्ज्ञानं भविष्यति। तत्र पञ्चकारणानि आवश्यकानि भवन्ति, तानि पञ्चकारणानि उपलम्भानुपलम्भाभ्यां ज्ञायन्ते। माधवाचार्यानुसारं बौद्धदर्शने प्रमाणद्वयं स्वीक्रियते- 'प्रत्यक्षानुमानम्'। तत्रापि प्रत्यक्षं निर्विकल्पकं वर्तते, अनुमानमपि द्विविधं स्वीक्रियते- स्वार्थानुमानं परार्थानुमानञ्च। तत्र बौद्धानां चत्वारः सम्प्रदायाः विद्यन्ते- १. माध्यमिकः, २. योगाचारः, ३. सौत्रान्तिकः ४. वैभाषिकश्च। ते क्रमेण सर्वशून्यत्व-बाह्यार्थशून्यत्व-बाह्यार्थानुमेयत्व-बाह्यार्थप्रत्यक्षत्वादीन् आतिष्ठन्ते।

**कूटशब्दः** अविनाभावः, अन्वयः, व्यतिरेकः, व्याप्तिः, अनुलब्धः, उपलम्भः, अर्थक्रियाकारी।

## प्रस्तावना
माधवाचार्यस्य सर्वदर्शसङ्ग्रहनामको ग्रन्थोऽतीव महत्त्वपूर्णं स्थानं भजते। ग्रन्थेऽस्मिन् मया टीकाद्वयं लब्धम्- महामोहपाध्याय-अभ्यङ्करोपाह्ववासुदेव-शास्त्रिविरचितया दर्शनाङ्कुराभिधया व्याख्यया समापेतः पुण्यपत्तस्थ-प्राच्यविद्याशोधन-मन्दिराधिकृतैः मुम्बय्यां निर्णयसागरमुद्रणालये मुद्रयित्वा शाके १८४६ वत्सरे, १९२४ ख्रिस्ताब्दे प्राकाश्यं नीतः। एवमेव मुजफ्फरपुरप्रान्तर्गतो मधुरपुरनिवासि पं. श्रीउदयनारायणसिंहकृत-भाषाटीकासहितः खेमराजश्रीकृष्णदासश्रेष्ठिना मुम्बय्यां स्वकीये श्रीवेङ्केटेश्वर स्टीमयन्त्रालये विक्रम संवत् १९६२तथा शाके १८२७ मध्ये मुद्रयित्वा प्रकाशितः। यद्यपि नैकानि संस्कराणि प्रकाशितानि, किन्तु राष्ट्रभाषाहिन्द्यां न कोऽपि उत्तमानुवादो व्याख्या च वर्तेते। अतः प्रस्तुतसंस्करणाय प्रयासो विहितः। भारतीय- पाश्चात्यविद्वद्भि विलिखिता नैके आधुनिकग्रन्थाः, यद्यपि दर्शनमध्येतुं प्रचुरसामग्रीं विषयवस्तु च प्रददति। किन्तु प्राचीनभारतीयपरम्परानिर्वहेण माधवाचार्येण विलिखितस्यास्य ग्रन्थस्य अवमन्थनं कस्मिंश्चिदपि मूल्ये कर्तुं न शक्यते। यथा- पाण्डित्यपूर्णशैल्यां माधवाचार्येण स्वीयसमये प्रसिद्धदर्शनानां सङ्कलनाय प्रयासो विहितः, तस्य सर्वाङ्पूर्ण-विरचितायां न किमप्यवशिष्टम्।

तादृशः सङ्ग्रहोऽन्यत्र लब्धुं दौष्कर्यमेव, दर्शनानां विवेचनायाम् उद्धरणानां प्रयोगो लेखकस्य अद्वितीय-पाण्डित्यस्य महत्त्वं प्रत्येकस्यां पङ्क्तौ प्रसरति। तद्विवेचनं गम्भीरं स्यात्, पूर्वपक्षे सिद्धान्ते च भीषणविवादः स्यात् उत वा कस्यचिद् दर्शनस्य पदार्थानां गणना स्यात्। माधवाचार्यस्य शैली एकरूपताया अद्वितीयं दृष्टान्तम् उपस्थापयति।[1] प्राय एवं दृश्यते यत् कस्यचिद् विशिष्टसम्प्रदायस्य लेखकः अपरसम्प्रदायान् विवेचयन् स्वविचारान् आरोपयति अथवा तं विवेच्य सम्प्रदायम् आलोचयति। कश्चिदपि लेखको निष्पक्षोऽथवा वस्तुनिष्ठो वर्तते इति मतं त्रुटिपूर्णं स्यात्, किन्तु माधवाचार्यस्तु अस्मै नियमाय अपवादस्वरूप एव। यतो हि कस्यचिदपि सम्प्रदायस्य विवेचनायाम् आचार्यस्य निष्पक्षता श्लाघनीया वर्तते, स चार्वाकः स्यात् उत वा अपरः सम्प्रदायः। प्रत्येकस्य दर्शनस्य सिद्धान्तानां पदार्थानाञ्च व्याख्या आधिक्येन माधवाचार्येण सुस्पष्टतया निर्विकारभावेन विहिता। एतस्मादेव कारणाद् भारतीयदर्शनानाम् अध्ययने तस्य सर्वदर्शनसङ्ग्रहः एतावन्महत्त्वं सन्धत्ते।[2]

माधवाचार्येण प्रोच्यते- बौद्धानां मते अन्वयव्यतिरेकेण व्याप्तिज्ञानमसम्भवम्। बौद्धैर्विधिद्वयम् एतदर्थं न मन्यते, यतोऽन्वयव्यतिरेकाभ्यां समीपवर्तिनाम् उदाहरणानां वर्तमानकाले ज्ञानं न भवेत्, किन्तु कालान्तरे देशान्तरे च विद्यमानानां पदार्थानां व्याप्तिर्भवितुं नार्हति। कदाचित्तत्र धूमाग्न्यो व्यभिचारो भविष्यत्येव।[3] तदुत्पत्या अविनाभावस्य अथवा व्याप्तेर्ज्ञानं भविष्यति। तत्र पञ्च कारणानि आवश्यकानि- तानि पञ्च कारणानि उपलम्भानुपलम्भाभ्यां ज्ञायन्ते, तानि सन्ति-

---

[1] माधवाचार्य, सन्-२०१०, सर्वदर्शनसङ्ग्रह पूर्वपीठिका, चौखम्बा विद्याभवन वाराणसी, पृ,सं. २५

[2] माधवाचार्य, सन्-२०१०, सर्वदर्शनसङ्ग्रह पूर्वपीठिका, चौखम्बा विद्याभवन वाराणसी, पृ,सं.२६

[3] माधवाचार्य, सन्-२०१०, सर्वदर्शनसङ्ग्रह, चौखम्बा विद्याभवन वाराणसी, पृं.सं.२६

| अनुपलब्धः | उपलम्भः |
|---|---|
| उत्पत्तेः पूर्वं कार्यानुपलम्भः | कारणोपलम्भे सति- |
| कारणानुपलम्भे सति- | कार्योपलम्भः |
| कार्यानुपलम्भः | |

तत्र तादात्म्येनापि अविनाभावो निश्चीयते, यथा-शिंशपा वृक्षः। तत्रोदाहरणे शिंशपायां वृक्षे च द्वयोर्मध्ये तादात्म्यसम्बन्धो वर्तते, द्वयोरेव धर्म आत्मा अथवा आधार एक एव। अतो निष्कर्षेण वक्तुं शक्यते यत् तादात्म्येन अविनाभावो निश्चीयते।[4]

माधवाचार्यानुसारं बौद्धदर्शने प्रमाणद्वयं स्वीक्रियते- प्रत्यक्षानुमानम्। तत्रापि प्रत्यक्षं निर्विकल्पकं वर्तते, अनुमानमपि स्वार्थानुमानं परार्थानुमानञ्चेति द्विविधं स्वीक्रियते। स्वस्मै यदनुमानं क्रियते तत्स्वार्थानुमानमुच्यते। यत्परस्मै त्रि-अवयववाक्यैः (प्रतिज्ञा-हेतु-दृष्टान्तैः) अनुमानं क्रियते, तदेव परार्थानुमानं प्रोच्यते। शब्दप्रमाणं यदि मन्यते चेत् तदनुमानान्तरमेव स्वीकर्तुं शक्यते। शब्दप्रमाणं स्वीकर्तुं न शक्यते, यतस्तत्र अर्थक्रियाकारित्वम् आवश्यकम्, यथा- मे माता वन्ध्या। इत्यत्र माता वर्तते चेत् कथं वन्ध्या ? वन्ध्या वर्तते चेत् कथं माता भवितुमर्हति ? अत एकस्यां दशायां द्वयोरेव स्थितिरसम्भवा। शब्दप्रमाणं स्वीकर्तुं- 'शब्देऽपि अर्थविनिवेदयात्' इति हेतोः प्रमाणं मन्यते।[5]

तत्र १. माध्यमिकः, २. योगाचारः, ३. सौत्रान्तिकः ३. वैभाषिकश्चेति बौद्धानां चत्वारः सम्प्रदाया वर्तन्ते। ते क्रमेण सर्वशून्यत्व-बाह्यार्थशून्यत्व-बाह्यार्थानुमेयत्व-बाह्यार्थप्रत्यक्षत्वादीन् आतिष्ठन्ते। बौद्धमतानुसारं सर्वं क्षणिकम्, यत्किमप्युत्पद्यते तत्संस्कृतम्, यत्संस्कृतं तदवश्यमेव विनश्यति। संसारेऽस्मिन् सर्वेऽपि पदार्थाः क्षणिकाः, सर्वेऽपि संस्काराः क्षणिकाः।

बौद्धाः सामान्यं पदार्थरूपेण न स्वीकुर्वन्ति, ते कथयन्ति तद्यथा स्वकीया सत्ता, तथैव सामान्यस्य सत्ता विद्यते। एवं कृते नैके प्रयोजकाः आवश्यकाः भवन्ति तच्चाधिकं श्रमसाध्यं भवति। नैतावत् सामान्यसत्ता नैकस्मिन् एकस्योपस्थितिरनुपस्थिति-विषयविकल्पान् दौविध्येन सिद्ध्यति। नैकस्मिन् एकः सामान्यो भवति, यदि स उपतिष्ठेच्चेदपि दोषः, नो चेदपि दोष एव। अतो सामान्यस्य सत्ता नास्तीति वक्तुं शक्यते।[6]

संसारोऽयं दुःखयुक्तः, अनेन वाक्येन सर्वेऽपि आस्तिका नास्तिकाश्च सम्मताः। यदि संसारः दुःखमयो नास्ति चेत् कथं मनुष्यः तस्माद् दुःखान्निवृत्यर्थं प्रयतते ? अस्मादेव कारणाद् बौद्धा एवं भावयन्ति- सर्वं दुःखं दुःखम्।[7] कश्चित् पृच्छति चेत् तत्रोत्तरं भवति- एवं न सर्वेषां स्व-स्वलक्षणं भवति (All are types in themselves) तथा सर्वं क्षणिकमिति। कस्यचित् साधारणलक्षणस्य अभावे इदं वक्तुम् असम्भवं यदिदं समम् अपरमपि विद्यते। अत एवं भावना भवेत्- सर्वेषां पदार्थानां स्वलक्षणं वर्तत इति। तत्स्वलक्षणं प्रमाणे प्रत्यक्षस्य एव जायते।[8]

बौद्धदर्शने माध्यमिकसम्प्रदाये सर्वेऽपि पदार्थाः शून्याः इत्युच्यन्ते। यथा- अन्धकारे अहं घटं नापश्यम् इत्यस्मिन् वाक्ये दर्शनक्रियाया एव निषेधः, न तु द्रष्टुः अन्धकारस्य घटस्य वा निषेधः। पादाभ्यां गच्छति रथेन न, इत्यस्मिन् वाक्ये प्रधानभूताया गमनक्रियाया अपि निषेधो नास्ति। यदि विशेष्यं बाधारूपेण स्यात्तदा विधिः प्रतिषेधश्च विशेषणे एव युज्यते- अतो रथस्यैव केवलं निषेधः। शून्यवादिभिः इदं विरुध्यते, तत्रार्धो निषेधः अर्धश्च विधिः, द्वयोर्मध्ये तादात्म्यत्वं नैव भवति। यदि विधिरस्ति चेत् सर्वेषां स्यान्निषेधोऽस्ति चेत् सर्वेषामेव, किन्तु विरोधिन इदं न मन्यन्ते न तत्रार्धजरतीयन्यायो भवितुमर्हति। शून्यवादे सर्वेषां निषेधः क्रियते।[9]

योगाचारमतानुसारं विज्ञानम्, मनस्, चित्तञ्च सर्वम् एकमेव वर्तते। माध्यमिकानुसारं सकलसंसारः असत्यरूपकः, किन्तु योगाचारानुसारं- तेनायं संसारो ज्ञायते प्रतीयते वा स तु ग्रहणीय एव। अत एव बुद्धि-चित्त-मन-विज्ञानानि सर्वाण्यपि सत्यपदार्थत्वेन ज्ञायन्ते। विज्ञानग्रहणेनैवायं सम्प्रदायो विज्ञानवाद इति मन्यते। मतस्यास्य अपेक्षाकृतप्रचारो देशे विदेशे आधिक्येन बभूव, अनेनैव सम्प्रदायेन नैयायिकानां विरोधं विधाय बौद्धन्यायः प्रारब्धः। बौद्धन्यायस्यार्थः–योगाचारसम्प्रदायस्य ग्रन्थाः, सम्प्रदायस्यास्य लङ्कावतारसूत्रम् प्रसिद्धो ग्रन्थो वर्तते। योगाचारैः बाह्यपदार्थानां खण्डनं क्रियते। एतेषां मते बाह्यार्थशून्यत्ववाद एव वर्तते। ये केऽपि बाह्यपदार्थाः ते सर्वे शून्ययुक्ता इति निष्कर्षः। [10]

एतेषां मते बुद्ध्या स्वातिरिक्तं न किमपि ग्राह्यते। तद्विषयस्वरूपेण विद्यमाना बुद्धिः स्वयमेव प्रकाशवत् स्वं प्रकाशयति। बुद्ध्या केवलं बुद्धिरेव ग्राह्या न तु अपरं वस्तु। अतो निष्कर्षतया वक्तुं शक्यते यत् प्रकाशस्तु स्वं प्रकाश्य अखिलं संसारं प्रकाशयति, किन्तु बुद्धिः केवलं स्वमेव प्रकाशयति।[11]

तत्र सौत्रान्तिकमते बाह्यार्था ये भवन्ति, ते अनुमेया एव। बुद्धिर्बोधस्तु अहम् इत्यनेन बाह्यपदार्थस्य च बोधः इदम् इत्यनेन जायते। जगति नील-पीतादि-विचित्रपदार्थाः बुद्ध्याकाराः, अतस्ते अनुमेयाः अनुमानसिद्धाः। सर्वदर्शनसङ्ग्रहे प्रोक्तम्-

नीलपीतादिभिश्चित्तैर्द्वयकारैरिहान्तरैः।
सौत्रान्तिकमते नित्यं बाह्यार्थस्तु अनुमीयते।[12]

आलयविज्ञानं प्रवृत्तिविज्ञानञ्च सिद्धान्तद्वयं विज्ञानवादस्य वर्तते। अनयोः प्रयोगं सौत्रान्तिकाः एतान्नेव खण्डयितुं कुर्वन्ति, योगाचारैः अद्वैतवादिभिः शुद्धविज्ञानम्, प्रत्ययः, चित्तं चैतन्यञ्चैकमात्रं सदुच्यते। यद्यपि बुद्धिरेकैव, परन्तु विविध-वासनायाः प्रतीयमानानि अस्याः स्वरूपाणि न कोऽपि विरोद्धुं शक्नोति।

प्रवृत्तिविज्ञानन्तु क्रियाशीलचित्तं येन विषयाः प्रतीयन्ते इदञ्च आत्मा समं नापितु आलयविज्ञानादेव उत्पद्यते तत्रैव च विलीयते। अस्य सप्तभेदाः – १. चक्षुर्विज्ञानम्, २. श्रोत्रविज्ञानम्, ३. घ्राणविज्ञानम्, ४. जिह्वाविज्ञानम्, ५. कायविज्ञानम्, ६. मनोविज्ञानम्, ७. क्लिष्टमनोविज्ञानञ्च। एतत्सर्वेषां विवेचनं बौद्धैः सूक्ष्मरूपेण कृतम्।[13] बौद्धानां मतमस्ति यज्ज्ञानमस्य चत्वारि कारणानि सन्ति- १. आलम्बनम् (Suggestion) २. समनन्तरम् (Suggestion), ३. सहकारी (Medium), 4. अधिपतिश्च (Dominant Organ)। एतेभ्यां चतुर्भ्यामेव कारणाभ्यां ज्ञानं क्रियते।[14]

एतेषां मते चित्तस्य चित्तविकाराणां रूपेण स्कन्धोऽयं (अमूर्ततत्त्वम्) पञ्चविधः – १. रूपस्कन्धः (Sensational), २. विज्ञानस्कन्धः (Perceptional), ३. वेदनास्कन्धः (Affectional), ४. संज्ञास्कन्धः (Verbal) ५. संस्कारस्कन्धश्च (Impressional) । स्कन्धानामयं वस्तुतत्त्वज्ञानाय समीचीनः, किन्तु बौद्धग्रन्थेषु विज्ञानस्कन्धाय द्वितीयं स्थानं न प्रदाय पञ्चमस्थानं प्रदत्तम्।[15]

सर्वदर्शनसङ्ग्रहानुसारं बौद्धानां मते चत्वारि आर्यसत्यानि सन्ति- १. दुःखम्, २. दुःखसमुदयः, ३. निरोधः ४. निरोधगमार्गश्च। एष्वेव आर्यसत्येषु बौद्धदर्शनं स्थितम्। भगवता बुद्धेन दार्शनिकप्रश्नानां विवेचनं विनैव आर्यसत्यानामुपदेशः प्रदत्तः।

बौद्धानां मते आध्यात्मिकवस्तूनां प्रत्ययोपनिबन्धनं यथा- कार्योत्पत्तिः पृथिवी-जल-विज्ञान-अग्नि-आकाश-विज्ञानैः षड्धातुभिः जायते। पृथिवीधातुना काये कठोरता, जल-धातुना वर्ण-परिपाकौ, वायुधातुना श्वासादिः, आकाशधातुना विस्तारः, विज्ञानधातुना च नामरूपं लभ्यन्ते। आध्यात्मिकवस्तूनां हेतूपनिबन्धकारणमेव भवचक्रमुच्यते। इदमेव 'प्रतीत्यसमुत्पादः' इत्युच्यते। अस्मिन् सति इदं भवति, अस्मिन् असतीदं न भवतीति अस्यार्थो वर्तते। [16] ग्रन्थेऽस्मिन् प्रतिपादेषु बौद्धसिद्धान्तेषु पालित्रिपिटकस्य प्रभावः सम्यक्तया वर्तते न वा इत्यस्यां शङ्कायामुत्तरं भवति- आम् प्रायः सर्वेष्वपि सिद्धान्तेषु पालित्रिपिटकस्य प्रभावो वर्तते। यथा-सब्बे संखारा अनिच्चा, जाति पि दुक्खा, मरणं पि दुक्खं ति। प्रायः सर्वेऽपि सिद्धान्ताः तस्मादागताः।

---

[4] माधवाचार्य, सन्-२०१०, सर्वदर्शनसङ्ग्रह, चौखम्बा विद्याभवन वाराणसी, पृ.सं. २४

[5] माधवाचार्य, सन्-२०१०, सर्वदर्शनसङ्ग्रह, चौखम्बा विद्याभवन वाराणसी, पृ.सं. २९

[6] माधवाचार्य, सन्-२०१०, सर्वदर्शनसङ्ग्रह, चौखम्बा विद्याभवन वाराणसी, पृ.सं, ५०

[7] माधवाचार्य, सन्-२०१०, सर्वदर्शनसङ्ग्रह, चौखम्बा विद्याभवन वाराणसी, पृ.सं. ४०

[8] माधवाचार्य, सन्-२०१०, सर्वदर्शनसङ्ग्रह, चौखम्बा विद्याभवन वाराणसी, पृ.सं. ५२-५३

[9] माधवाचार्य, सन्-२०१०, सर्वदर्शनसङ्ग्रह, चौखम्बा विद्याभवन वाराणसी, पृ.सं. ४५

[10] माधवाचार्य, सन्-२०१०, सर्वदर्शनसङ्ग्रह, चौखम्बा विद्याभवन वाराणसी, पृ.सं. ५९

[11] माधवाचार्य, सन्-२०१०, सर्वदर्शनसङ्ग्रह, चौखम्बा विद्याभवन वाराणसी, पृ.सं. ६१

[12] माधवाचार्य, सन्-२०१०, सर्वदर्शनसङ्ग्रह, चौखम्बा विद्याभवन वाराणसी, पृ.सं. ६६

[13] माधवाचार्य, सन्-२०१०, सर्वदर्शनसङ्ग्रह, चौखम्बा विद्याभवन वाराणसी, पृ.सं. ७१

[14] माधवाचार्य, सन्-२०१०, सर्वदर्शनसङ्ग्रह, चौखम्बा विद्याभवन वाराणसी, पृ.सं. ७३

[15] माधवाचार्य, सन्-२०१०, सर्वदर्शनसङ्ग्रह, चौखम्बा विद्याभवन वाराणसी, पृ.सं. ७५

[16] माधवाचार्य, सन्-२०१०, सर्वदर्शनसङ्ग्रह, चौखम्बा विद्याभवन वाराणसी, पृ.सं. ८०

**शोधविधिः** – अस्मिन् शोधपत्रे मया निगनात्मकविधिस्तथा विश्लेषणात्मकपद्धतेः प्रयोगो विहितः।

**परिचय**

अविनाभावः - कार्यकारणवादः (कार्यम् उत्पत्तिपूर्वं कारणे भवतीति)।
अन्वयः – सम्बन्धितः (एकस्मिन् सति अपरस्य स्थितिः)।
व्यतिरेकः – असम्बन्धितः (एकस्मिन् असति अपरस्यापि अनुपस्थितिरिति)।
व्याप्तिः - साहचर्यम् (सह चरणमिति)।
अनुलब्धः – अभावः।
उपलम्भः – उपलब्धता।
अर्थक्रियाकारी - अर्थानुसारं कार्यमिति।

**निष्कर्ष**

सर्वदर्शनसङ्ग्रहे माधवाचार्येण नैके सिद्धान्ताः प्रतिपादिताः, अन्वयव्यतिरेकण व्याप्तिज्ञानम् असम्भवम्, भावनाचतुष्टयम् (माध्यमिक-योगाचार-वैभाषिक-सौत्रान्तिकाः), प्रतीत्यसमुत्पादः, आर्यसत्यानि (दुःखम्, दुःखसमुदायः, दुःखनिरोधः दुःखनिरोधगामिनीप्रतिपच्च), पञ्चस्कन्धः इत्यादयः। अस्य ग्रन्थस्य भाषाशैली उत्कृष्टा वर्तते, पूर्वपक्षं तथा उत्तरपक्षरूपेण समाधानं विधाय सिद्धान्ताः प्रतिपादिताः सन्ति माधवाचार्येण। अतः दर्शनसङ्ग्रहग्रन्थेष्वयं ग्रन्थः एकोऽन्यतम इति मन्यते।

**सन्दर्भ**

1. हरिभद्रसूरि आचार्य, सन्-१९९७, षड्दर्शनसमुच्चय, भारतीय ज्ञानपीठ प्रकाशन, वाराणसी
2. हरिभद्रसूरि आचार्य, सन्-२०१२, षड्दर्शनसमुच्चय, चौखम्बा कृष्णदास अकादमी वाराणसी
3. देवराज डॉ. नन्दकिशोर, सन्- १९९०, भारतीय दर्शन, उत्तर प्रदेश हिन्दी संस्थान
4. शर्मा चन्द्रधर, सन्-२०१३, भारतीय दर्शन आलोचन और अनुशीलन, मोतीलाल बनारसीदास वाराणसी।